दीधितिटीका

३० पत्राणि

नव्यरौद्री

१५०७

व्याप्त्यनंतरमित्यादिग्रंथस्यसूचितसंगतिंप्रकाशयतिअनुमितीति।अनुमितिस्वरूपंपदेकं
कार्यंतदनुकूलत्वेत्यर्थः।अनुकूलत्वंप्रकृतेपरामर्षनिष्ठहेतुतायाविषयितयावच्छेदक
त्वंव्याप्तेरिवपक्षधर्मतायाअप्यविकलंवस्तुगत्यायःपक्षस्तद्धर्मताज्ञानस्यहेतुत्वादिति
भावः।पक्षतायामप्येषैवसंगतिः।जनकतावछेदकसाधारणप्रयोजकत्वमावश्यानु
कूलत्वस्यव्याप्तिपक्षधर्मतयोःसत्वात्।उपाधिनातुसमंप्रसंगइतिध्येयं।निरूपयितु
मिति।धर्मत्वस्यहेतुतावछेदकसंबंधरूपस्यसुप्रसिद्धतयापक्षत्वविशिष्टनिरूपणे
नैवतद्धर्मतानिरूपणस्यकृतत्वादिति।यत्तुपक्षेधर्मत्वंयस्यां[illegible]तिबहुव्रीहिणास्वार्थेति ६
ल्प्रत्ययेनवापक्षतापरत्वंमूलदीधितिग्रंथयोः।रत्नापक्षधर्मतायाअनिरूपणेपिना
संगतिःनचलिखनसंक्षेपनिर्वंधिनोदीधितिकारस्यपक्षतामित्यस्योपेक्षायांवीजा

भाव॥ अनंतरार्थेकानंतर्यपदघटितसंगतिलक्षणकत्वेतेनक्षपर्यस्याकरणादिति॥
तन्नाग्रेपक्षनिरूपणस्यासंगतेः। केचित्तुलक्षणेतऽज्ञानंयदेकंकार्यंतदनुकूलत्वंवि
शेषणतयाजनकज्ञानविषयत्वं तथाचतद्विषयकज्ञानाविषयानुमितिलक्षणकत्वे
रूपघटकत्वरूपानुमितिलक्षणेयोद्भातेनव्याप्तेरिवतदनंतरंपक्षधर्मतायाअपिनि
रूपणमितिभावइत्याहुः। तन्न। लक्षणपदस्यलक्षणपतेः। परापर्षग्रंथइत्वलक्षणोयो
द्भातेनेत्यस्यैववक्तव्यतापानाच्च। व्याप्तीरतीति व्यादिनिरूपणानंतरमितिपाठासिद्धाये
ण। यत्तुव्याप्त्यनंतरमितिपाठेपितादृशपाठधारणे नहिप्रकृतग्रंथस्यस्वरांतपाठएव
धार्यतइत्यत्रप्रमाणमस्तिइतितन्न। इकारांतपाठस्यमूलेऽभावान्मूलीयपाठधारणा
नुपपत्तेः। साध्यवदन्यावृत्तित्वमितिमूलवाक्यस्यसाध्यवदितीत्यनेनधारणावत्त्वं

2

जनांतपाठधारणं तथा च ह्रस्वेकारयुक्तपाठ इत्यपि कश्चित्। मूले तत्रेति। पक्षधर्मता
यामित्यर्थः। सन्नम्यर्थो घटकत्वं पक्षतान्वयि। ननु संदिग्धधर्मधर्मित्वमिति मूलस्य सं
दिग्धः साध्यरूपो धर्मो यत्र धर्मिणि तत्त्वमित्यर्थः। धर्मत्वधर्मित्वे येन संबंधेनानुमिति
स्तेनाधेयत्वाधिकरणत्वे तथा च तेन संबंधेनासंबंधि साध्यपक्षकानुमितौ पक्षतावे
कल्यापत्तिरेवं पक्षसाध्यविशेष्यकसंशययोरेकतरोपादानेऽन्यतरासंग्रह इत्यत
आह यत्रेति। यद्धर्मावच्छिन्ने इत्यर्थः॥ सन्नम्यर्थो विषयत्वं निरूपितान्वयि तेन पाषाणमयत्वा
दिना पर्वते वह्नेः संदेहेपि पर्वतो वह्निमानिति निश्चयेन तादृशानुमितिः। साध्यस्येति वि
धेयांशोपप्रकारतापन्नं यत्साध्यतावच्छेदकं तत्पर्या[illegible]प्त्यधिकरणधर्मावच्छिन्नस्ये
त्यर्थः। षष्ठ्यर्थो विषयत्वमपि निरूपितान्वयि। तेन पर्वतो वह्निमानिति निर्णयसत्त्वेप

वेतेनैजस्त्वादिना वन्हेः संदेहेपि न तादृशानुमित्यापत्तिः। नवा लाघवज्ञानादिवशान्म
हानसीयवह्निमानित्यनुमितौ वह्निमान्नवेति संशयासंग्रहः। तत्र तद्धर्मावच्छिन्नेसप्त
म्यर्थोद्देश्यत्वमनुमित्यन्वयि संबंधेनेत्यत्र तृतीयार्थः सांसर्गिकविषयत्वमपि तत्तदन्व
यि। अनुमितावितिजनिकेति शेषः। सप्तम्यर्थः कार्यतानिरूपकत्वं जनकत्वरूपैकदे
शान्वयि। अत्र निर्णयत्वं पक्षेसाध्यप्रकारकत्वे सति पक्षतावच्छेदकावच्छिन्नाधिकर
णत्वविषयतानिरूपिताधेयत्वविषयतानिरूपितायासाध्यविरोधसंबंधावच्छिन्न
किंचिद्विषयतातच्छून्यत्वं न तु साध्याभावाप्रकारत्वगर्भं केवलान्वयिन्यप्रसिद्धेः। ता
दृशसंशयश्च पक्षविशेष्यकसाध्यतदभावप्रकारकः साध्यतदभावविशेष्यकपक्ष
प्रकारकः साध्यविशेष्यकपक्षातन्निष्ठाभावप्रकारकश्च इत्यादि संशयः। तादृशानिश्च

यनिवर्त्त्यैवाधस्यापक्षतात्वात्वादाह संशयइति नचतस्यतत्वेक्षतिविरहः विशिष्ट
वुद्धिप्रतिवंधकादेववाधकालेऽनुमित्यनुत्पत्तेरितिवाच्यं। तत्रमासव्यवहारविरह
ण त्वा। विशिष्टवुद्धिप्रतिवंधकतायामप्रामाण्यज्ञानसामान्यस्य संशयकारणतायां
चाप्रामाण्यनिश्चयस्योत्तेजकतया संदिग्धाप्रामाण्यकवाधसत्वेसिद्ध्यात्मकपरामर्षा
दनुमित्यापत्तेश्चानचैवं साध्यपक्षविशेष्यकसंशयाननुगमनादवस्थं। साध्यवि
षयतानिरूपिताधेयत्वविषयतानिरूपितपक्षविषयताशालिज्ञानस्यैवसाध्यप
क्षवैशिष्ट्यावगाहिज्ञानार्थकसंशयपदेनविवक्षणात्वा। एतेनपर्वतोवन्हिमांववा
न्वन्हिः पर्वतवान्नवेतिसंशयस्यापि साध्यपक्षवैशिष्ट्यावगाहित्तयापक्षतात्वाप
त्तिः केनचित्स्वकल्पितापरास्ता। तेनसंशयेनवन्हावाधेयत्वांनवगाहनात् नस्यनाव

मह।

~~मान् वह्निः पर्वतो वा न~~॥ सिद्धेश्च निवर्त्यतया तद्दलेनैव वारणात्। न च पर्वतो वह्निमान्
घटश्चेति निर्णयनिवर्त्यं पर्वतो वह्निमान् घटवान्न वेति संशयस्य तथात्ववारणमि
ति वाच्यं। तादृशनिश्चयत्वेन प्रतिबंधकताविवक्षणात्। न च घटपक्षकप्रमेयत्वसा
ध्यकस्थले साध्यविशेष्यकघटनिष्ठाभावप्रतियोगित्वतदभावप्रकारकसंशयासं
ग्रहः पक्षसाध्यवैशिष्ट्यानवगाहित्वादिति वाच्यं। तव घटे प्रमेयत्वं घटनिष्ठाभावी
यं वेत्यादिसंशयस्यैव संग्राह्यत्वात्। न चैवं केवलान्वयिग्रन्थे प्रमेयत्वं घटनिष्ठाभाव
प्रतियोगि न वेति संशयश्च घटः प्रमेय इति साध्यसिद्धिविरोधी भवत्येवेति मणिकृद्ग्र
न्थविरोधः। यतः। विशेषणविशेष्यभावभेदेऽपि विरोधिविषयत्वमात्रेण विरोधित्वमनु
भववलादास्थीयत इत्यादिना दीधितिकृतैव मूलीयतादृशवाक्यस्य प्रमेयत्वे आधे

यत्त्वावच्छिन्नस्वरूपप्रतियोगित्वसंबंधाभ्यां घटतन्निष्ठाभावप्रकारकसंशयता
त्पर्यकत्वं तात्पर्यविषयीकृतं अन्यथापक्षविशेष्यकसंशयात् तादृशाभावप्रति
योगित्वाभावरूपार्थभेदस्यैव तादृशसंशये सत्त्वात्। अधिकं तत्रैव स्फुटीभविष्यति
। न च तथापि प्रमेयत्वसामानाधिकरण्येन यत्र पक्षतावाच्यस्य तादात्म्येन साध्यता
तत्र पक्षत्वानुपपत्तिः। ईदृशानुमितावच्छेदकावच्छेदेन विरोध्यवगाहिसंशयस्यैव
संशयाद्युक्ततया प्रमेयत्वावच्छिन्ने चैकभेदाप्रसिद्ध्या तदवच्छिन्नभेदकोट्यप्रसिद्ध्या तत्को
टिकसंशयाप्रसिद्धेरिति वाच्यं। अवच्छेदकावच्छेदेन सामानाधिकरण्यमात्रेण चानु
मितावच्छेदकावच्छेदेन साध्यवत्तानिर्णयनिवर्त्यपक्षसाध्यवैशिष्ट्यावगाहिज्ञानत्वेन
लाघवादेकहेतुत्वकल्पनात्। न च समानाकारसिद्धिकालेऽनुमितिवारणायैवसं

शयकारणताकल्पनफलं तच्च न संभवति। सामानाधिकरण्यमात्रेण सिद्धौ तादृश
संशयादनुमित्यापत्तेरिति वाच्यं। व्याप्तिस्मरणादिमतोऽवच्छेदकावच्छेदेनांधकार
स्य घटसंशयोत्पत्तिकाल एवालोकसमवधानं ततोऽवच्छेदकावच्छेदेन घटत्वव्याप्य
वान्देश इति प्रत्यक्षं ततोऽनुमितेरिष्टत्वात्। कुत्रचित् सिद्धिकालेऽनुमितिवारण
स्यैव तत्प्रयोजनत्वात्। समानाकारसिद्धिमात्रनिवर्त्यसंशयस्य पक्षतात्वेपि एको न
द्वाविति प्रतीतेर्भेदावलंबित्वे तूभयभेदस्यैव प्रमेयत्वावच्छिन्ननिष्ठस्य कोटित्वसंभ
वात्। वह्नित्वादिनानावृत्त्यादिषु पर्वतत्वाद्यवच्छिन्नत्वप्रसिद्ध्यैव भेदत्वेन नानाभे
देष्वेव प्रमेयत्वावच्छिन्नत्वप्रसिद्ध्या कोटिप्रसिद्धिसंभवाच्च। अप्रसिद्धाभाववत्साध्यक
स्थले विशिष्टसिद्ध्यभावपक्षतावादिनश्चैतन्मतेपि साध्यज्ञानाभावस्यैव पक्षता

त्वमितिा न स्यात् व्याप्तिनिरूपणानंतरमित्यादिविचारः प्रसिद्धसाध्यक एवेति ध्येयं। अथ
व्याप्तिस्मरणादिनास्य संशयस्थलेपि परामर्शाव्यवहितपूर्वं संशयोत्पत्त्यैवानुमितिरिति
फलबलात्कल्पनीयमिति न मूलोक्तदोष इति चेत् वह्निव्याप्यवत्पक्षक वह्निसाध्यक
सं०श स्थलेऽनाहार्यपतादृशोयाप्रसिद्धिः समानविषयकश्रवणानंतरानुमितिबोधकवेदानुप
पत्तिः घनगर्जितेन मेघानुमानानुपपत्तिश्च संशयपक्षतायां दोषद्वयं न तत्त्वं। यत्तुमा
हानसीयवह्निसाध्यकस्थले वह्निसामान्यसंशयस्य न पक्षतात्वमिति तन्न। इच्छाद्व्या
प्तितानवेति विप्रतिपत्तावितरबाधबलादस्य द्व्यातिरिक्तद्व्याप्तितत्वानुमित्युपयो
गस्य सकलप्रामाणिकसिद्धत्वात्। बाधवारकसंशयपदेन बाधप्रतिबध्यत्वविवक्ष
णं तु न सम्यक्। उभयासाध्यकस्थले प्रत्येकसंशयसंग्रहप्रसंगात्। यत्तु साध्यताव

च्छेदकावच्छिन्नविषयताघटितधर्मावच्छिन्ननिवर्त्यत्वनिवेशान्नवह्निव्याप्यादिसा
ध्यकेवह्न्यादिसंशयस्यपक्षतात्वापत्तिः।वह्न्यभाववविषयतायांतत्प्रतिवध्यतावच्छेदि
कायांवह्निव्याप्यविषयत्वाघटितत्वादितितन्नावह्न्यभावादिसाध्यकस्थलेवह्निमा
न्नवेतिसंशयासंग्रहप्रसंगात्।केचित्तुवाधप्रतिवध्यतावच्छेदकस्वनिष्ठविषयताघ
टितधर्मावच्छिन्नायासाध्यवत्तानिर्णयत्वावच्छिन्नप्रतिवंधकतानिरूपितप्रतिवध्यता
वच्छेदकावच्छिन्नप्रतिवध्यतानच्छालित्वेनजनकत्वमित्याहुः।नतुछं।विशेषानुमितौ
सामान्यसंशयस्यापक्षत्वापत्तेः।ननुपक्षतावच्छेदकसामानाधिकरण्यमात्रेणोभ
यकोटिमवगाहमानसमुच्चयस्यपक्षतावच्छेदकावच्छेदेनसाध्यनिर्णयनिवर्त्यस्यप
क्षतात्वापत्तिरितिचेन्नासाध्यपक्षद्वैत्रिष्ठविषयतायांविरोधिकोटिमद्वृत्तित्व

रूपविरोधावच्छिन्नत्वनिवेशात्।अव्याप्यवृत्तित्वज्ञाननियतसमुच्चयेन विरोधा
नवगाहनात्।नचान्यविधविरोधावगाहिसंशयासंग्रहः।तावद्विरोधान्यतमस्यैव
निवेशात्।केचित्तु।बाधप्रतिवध्यतावच्छेदकेत्यादिनानिरुक्तौसमुच्चयस्यनसंग्रहः
अव्याप्यवृत्तित्वज्ञानस्योत्तेजकत्वापेक्षयालाघवान्निरवच्छिन्नाधारत्वसंसर्गावगा
हित्वरूपव्याप्यवृत्तित्वावगाहित्वनिवेशेनतादृशावगाहित्वमन्यसमुच्चयस्यस्वप
दार्थत्वाभावादित्याहुः।तन्नप्राचीनैर्वैज्ञानिकतदधिकरणवृत्तित्वरूपविरोधसंस
र्गावगाहित्वेनैवप्रतिबंधकतोपगमात्।वद्धनव्यमतसाधारण्यायमदुं [redacted] स्यावश्य क
कत्वाच्च।।यादृशासंबंधेत्यस्यफलमाहुनवेति।संबंधांतरेणेति।तत्कालीनतत्सुरू
पीयनिर्णयाविषयसंबंधेनेत्यर्थः।।निर्णयश्चान्यकालेकथंचिदिष्टापत्तेरपिसंभवा

दाह निर्णीतेति। नच संबंधानिवेशो निर्णयत्वस्य दुर्वचत्वेन प्रतिबंधकत्वमेव दुर्वच
मिति वाच्यं। तादृशज्ञाननिष्ठप्रतिबंधकत्वनिवेशाभिप्रायेण दूषणदानादित्यवधे
यं।पतु। यत्किंचित्संसर्गकनिर्णयनिवसेत्वनिवेशाभिप्रायेणेदमिति तन्न। यत्वतत्व
यो। कथ्ययापतिरिति। रनुगमेऽप्रतीकारात्। संदिग्धे साध्ये धर्मत्वयस्यत्यर्थेपिध
र्मत्वविवक्षणफलमाहत्तनइति। विशेषणतयातयः प्रसक्तेर्गगनादेश्च धर्मित्वधर्मत्व
सत्वादाह समवापेनेति। तथाच साध्यतावच्छेदकसंबंधेन यद्धर्मत्वं धर्मित्वं च विष
सितुमर्हं नान्यदनुपयुक्तत्वात् तदपि न निष्ठमिति भावः॥ संदिग्धः साध्यरूपो धर्मीय
स्येत्यर्थे धर्मत्वाविवक्षणफलमाह गगनादीति। तद्वैकल्यं। पक्षताविरहः। संदिग्ध
साध्येत्यादि यथाश्रुतमूलाभिप्रायेण विशेषणत्वोपलक्षणत्वविकल्पेन दूषणं सं

शयस्यपक्षतात्वेत्वनुमितेःपूर्वंसंशयस्यासत्त्वेनहेतुत्वासंभवएवदोषइतिध्ये
ये।परामर्शनिष्ठकारणतायामवच्छेदिकापक्षतेत्यभिप्रायेणविशेषणत्वोपलक्ष
णत्वविकल्पइत्यपिकश्चित्।साक्षात्परंपरयावाकारणत्वरूपविशेषणत्वोपल
क्षणत्वविकल्पइत्यन्ये।केवलान्वयिग्रंथेयद्वासंशययोग्यतेवानुमानांगमित्यादि
नामणिकृतास्ययोग्यतात्वकथनात्तदभिप्रायेणहसंशयेतिपक्षतात्वेनेत्यादि।अ
नुमित्साऽयोग्यतायाइवसंशययोग्यतायानिवारणस्याकरणात्न्यूनत्वंपरिहरति
संशयेतीत्यपिकश्चित्।तन्न।तथासतियोग्यतायोग्यत्वानिवारणेनन्यूनत्वाप
त्तेः।ननुसाधकबाधकेत्यत्रसिद्धिबाधजनकत्वंतद्योग्यताउपधायकतासंबंधेन
तद्विशिष्टत्वंवानाद्यः।मनःसंयोगादिसत्वादनुमितिमात्रानुत्पत्त्यापत्तेः।नद्वि

7

तीयःसिद्धिबाधविशिष्टसत्वेतत्सत्वावच्छेदकतयालाघवात्तदभावस्यैवपक्षतात्वो
दित्यादित्याशयेनाहसिद्धीति।तथाचधर्मेतसाध्यबाधपदोत्तरंस्वार्थेकप्रत्ययइ
तिभावः।तथाचसाधकस्यानुमितिकरणस्यबाधःफलानुत्पादोयाभ्यांतादृशामाने
सिद्धिबाधावित्यर्थइतिभावइतिपितृचरणाः।पितामहचरणास्तु।तथाचप्रत्यया
र्थोनविवक्षितइतिभावइत्याहुस्तन्नत्वध्यामहेणकप्रत्ययस्यस्वार्थेऽनुशासना
दर्शनात्।परन्तु।साधकबाधकयोर्मानेइत्यर्थः।जन्यत्वेषष्ठ्यर्थोमानपदार्थेमित्यन्व
यीतिभावइतितत्तुच्छं।सिद्ध्यादिजनकजन्यसिद्ध्यादिपरत्वेसंदर्भेविरोधात्।ननु
बाधपदस्यपक्षेसाध्याभावनिश्चयएवप्रसिद्धतयाकेवलान्वयिसाध्यकेसाध्या
भावाप्रसिद्ध्याबाधाप्रसिद्धिःप्रतियोगितासंबंधेनभ्रमस्यप्राचामनभ्युपगमेन

घटाभावादावपिप्रमेयत्वादिभ्रमासंभवादित्यत आह केवलान्वयिनिचेति। प्र
मेयत्वादौ चेत्यर्थः। कश्चित्तु साध्यइतिपरयतितन्न अनुपयुक्तत्वात्। प्रतियोगि
ताभ्रमांगीकारे तु प्रमेयत्वेन घटाभावप्रकारकपक्षविशेष्यकस्यापि बाधस्य सं
भवइति ध्येयं। धीर्निर्णयः। न च नानाविधबाधनिवेशे तुल्ययुक्त्या पक्षसाध्यवि
शेष्यकसिद्धिनिवेशोपि च नाप्यभावद्वयमिति मूला संगतिरिति वाच्यं। पक्षे साध्य
तदभाववत्त्वज्ञाने [illegible] विरोधित्वाभ्यां तावनुगमय्याभावनिवेशात्। तदभावव्या(
प्यवत्ताज्ञानव्यावृत्तमत्र विरोधित्वं। मूले प्रत्यक्षपरिकलितमिति। प्रत्यक्षेण नि
श्चितमित्यर्थः। निश्चयो बोधे समानकालीनत्वसंबंधेन विशेषणं। विशेष्यान्वयिना
न्वयित्वात् अनुमानेनेति तृतीयार्थो जन्यत्वं बोधान्वयि तेन विरोधप्रसक्तिः।

अन्यथाविसंवादीछासंभवेनाविरोधापत्तेः।सनूष्टस्ययार्थोनविवक्षितइत्यपिक
क्षितं।सिषाधयिषाविरहेपिघनवार्जितेनेत्यादिमूलमवतारयतिदीधितौनन्वि
ति।तत्रापिस्वानंतरव्याप्तिस्मरणादिनात्पसिषाधयिषास्थलेपिपुनरितिपूर्वप
रामर्शोत्तरमित्यर्थः।पुनरनुमित्सापरामर्षोत्तरमनुमित्सांतरमितिव्याख्यान
मसत्।अंतरपदवैयर्थ्यात्।ननुपरामर्षस्यस्वोत्तरजातेष्टसाधनताज्ञानेनानु
मित्साक्षणेनाशात्।तदुत्तरक्षणेकथमनुमितिरित्यतआहततःपरामर्षोत्तरमि
ति।ततइतिअनुमितिरित्यानिमेणान्वितं।ननुअनुमित्साक्षणेविशेषणज्ञाना
भावात्कथंतत्रप्रत्यक्षात्मकपरामर्षः।नचेष्टसाधनस्मरणमेवपरामर्षव्या
प्याद्विज्ञानात्मकंतथासतितेनैवानुमित्सांतरमनुमितिमित्युत्पादसंभवेपराम

र्षोत्तरासंभवात्। नच स्मरणात्मकमेव परामर्शोत्तरं गौरवादित्यभिप्रायेणाह स्मरणा
त्मकोद्ये ति। बहिरिन्द्रियस्यानुमितिविशेष्यकज्ञानाजनकत्वात् स्मरणत्युक्तं इदमु
पलक्षणं। मानसत्वमपि तस्य बोध्यं। पतु विशेषणज्ञानकल्पनागौरवात् स्मरण
त्युक्तमिति तन्न पूर्वपरामर्षस्यैव सत्वेन तत्कल्पनाभावात् नचामुमित्सा काले
५साामाना ऽनुमितिं[illegible]वलत्वात् त्वनुमित्यापत्तिः अनुमित्सारूपपक्षत्वाभावात् नच वह्न्यनुमि
तिर्जायतां प्रत्यक्षादिभिन्नज्ञानं जायतामित्यादिनानाविधेच्छानामननुगमात् कार
णत्वानुपपत्तिरिति वाच्यं। यादृशयादृशेच्छासत्वेऽनुमितिस्तत्तदिच्छानां नानाहेतु
त्वोपगमात्। नच परस्परं विनानुमित्युत्पादाद्व्यभिचारः। स्वसामानाधिकरण्याव
च्छिन्नस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधेन तत्तदिच्छाविशिष्टानुमितित्वस्यैव त

त्तदिच्छाकार्यतावच्छेदकत्वोपगमात्। नचकार्यतावच्छेदकेन तत्तदिच्छावैशिष्ट्यं निवेश्या
नेन तत्तदिच्छाहेतुत्वापेक्षयालाघवात् वन्ह्यनुमितित्वावच्छिन्नं प्रति तादृशेच्छाभावकू
टत्वावच्छिन्नाभावत्वेनैकहेतुत्वमस्त्विति वाच्यं। अभावनिष्ठयावत्त्वस्यापेक्षाबुद्धिविशे
षविषयत्वरूपस्य ज्ञाननिष्ठविशेषस्य तत्तद्विशेष्यकत्वादिरूपस्य च विशेष्यविशेषण
भावविनिगमकाभावेन कार्यकारणभावानंत्यप्रसंगात् फलबलादिति अनुमितिरू
पकार्यकार्येण सिषाधयिषारूपकारणेनानुमानादित्यर्थः। तथाचैतादृशशरीरात्सिषा
धयिषानुत्पादे फलाभावोपि कल्पनीय इति भावः॥ सिषाधयिषाविरहेपीति मूले। अ
नुमानतरीत्यादि तथाच सामानाधिकरण्यप्रत्यासत्त्या न हेतुत्वमिति भावः। तेनेश्वरा
नुमित्सासत्वेपि नासंगतिः। नच तां विनामेघानुमितिरपलपनीया। अनुभवविरो

धात्।एवं विषयविशेषे यत्पुरुषस्यानुमितिपूर्वं तत्रेष्टसाधनताज्ञानविरहेणानु
मित्साविरहेपि तदनुमानादिति स्वकारणेत्यादिमूलार्थो बोध्यः। सिद्धमतं दूषय
तिनचेतिवाच्यमित्यग्रेतनेनान्वयः। अनुमितीतितत्पुरुषीयतत्साध्यपक्षकानुमि
तीत्यर्थः। इच्छेवेति एवकारोपिवदर्थकः। पक्षतेति। तादृशानुमितौ जनिकेत्यादि
।स्वमनुमाता। तथाच कालिकप्रत्यासत्त्यैव हेतुहेतुमद्भावइति भावः। सुलभेतितत्
थाच गर्जितनमेवानुमाने सुतरां सुलभेति भावः॥ तस्याईश्वरेच्छायाः। तथाच सि
द्धिकालेप्यनुमित्यापत्तिरिति भावः। तदानीं सिद्धिकाले। तज्जनकत्वमनुमितिज
नकत्वं तथाच सत्यष्टिपूर्वं सिसृक्षात्ववदनुमितिपूर्वमेवानुमितिजनकत्वसत्वे
नतद्विशिष्टस्य फलोपधाने तंत्रत्वान्नापत्तिरिति भावः। जनकत्वे जनकत्वेसु

ट्वाद्रात्माश्रयमुपेक्ष्याह तदिति तत्ताद्दृशानुमितिजनकत्वं हिर्पतः। तद्योग्यता
ता ताद्दृशानुमितिस्वरूपयोग्यता तत्कारणतावच्छेदको धर्मः एतेनात्माश्रयः प्रत्युक्तः
अनपायादिति सिद्धिकालेपि कारणतावच्छेदकरूपयोग्यत्वस्य च्छायांसत्वादित्य
र्थः। तदुपधानं उपधापकता संवंधेन ताद्दृशानुमितिविशिष्टत्वा। तदभावात्। अ
नुमितिवैशिष्ट्याभावात्। तथा चानुमितौ सत्यामेवानुमितिः स्यान्नान्यदा कारणता
वच्छेदकोपलक्षितपूर्वसत्वस्य कार्योत्पादे तंत्रत्वेनुसिद्धिकालेप्यनुमित्यापत्तिरि
ति भावः। न तत्तु सामग्रीति ताद्दृशानुमितिसामग्रीविशिष्टत्वं ताद्दृशानुमितिजन
कत्वेनेत्यर्थः। मात्रपदं कृत्स्नार्थकं। पक्षता कुक्षीति। तन्निष्ठकारणतावच्छेदक
त्वप्रसंगादित्यर्थः। तथा च परामर्षादीनां कारणतावच्छेदकतयान्यथासिद्धत्वेन

तच्छून्यकालेऽनुमित्यापत्तिविरहेणचपक्षतामात्रेहेतुत्वेएककारणपरिशेषा
पत्तिरितिजितंबौद्धैरितिभावः।ननुपरामर्षत्वादिनान्वयाद्यनुविधानात्तेनरूपेण
हेतुत्वमप्यशक्यापन्हवमित्यतआहशेषेति।अनुमितिसामग्र्याएवपक्षतात्वसं
भवेदृष्टारूपशेषभागस्यवैयर्थ्यादित्यर्थः।नन्वनुमितिसामग्रीविशिष्टेच्छापक्षप
दप्रवृत्तिनिमित्तंजनकत्वमनुमितिसामग्र्यास्तत्तद्रूपेणस्वयाअनुमित्सात्वेनेति।
सिद्धिकालेत्वनुमितिसामग्र्यभावादेवनानुमितिरतआहतदानीमितिसिद्धिपरा
मर्षादिदशायामित्यर्थः।इदंचविरहान्वपि।वक्तव्यतेति।तथाचपरामर्षादिरूपका
रणस्यनित्येच्छारूपपक्षतायाश्चसत्वेऽनुमितिसामग्र्यभावोपदभावात्सएवहेतुर
स्तुकिमुक्तपक्षतायाहेतुत्वेनतादृशाकारणंसिषाधयिषाविरहविशिष्टसिद्ध्य

भावरूपमितितस्यैवपक्षतात्वमितितुसिद्धांतरहस्यमितिभावः॥परामर्षरूप
कारणसत्वेसिद्धिरूपविरोधिसत्वेसिषाधयिषासत्वेयद्यनुमितिःस्यात्तदातस्या
उत्तेजकत्वंसंभाव्येतनचैतत्संभवतियोग्यात्मविशेषगुणत्रयस्यएकक्षणावृत्तेः
नचापेक्षाबुद्ध्यात्मकस्यसाध्यनिश्चयस्यपरामर्षस्यवात्रप्रथममुत्पादस्ततस्तृ
तीयक्षणेद्वित्वोत्पादेत्रयाणामेकक्षणवृत्तित्वसंभवइतिवाच्यंभवतातत्रचतुर्थक्ष
णेऽनुमितिस्वीकारेणद्वित्वप्रत्यक्षाभावेनापेक्षाबुद्धेःक्षणत्रयावृत्तेतदमु

त्सुरूपीयस्येत्यादेरनवरतेत्यादिश्च ग्रंथस्यासंगत्यापतेः। तदुत्पादेति। अनुमित्सोत्पा
देत्यर्थः। सानुमितिः। अनवरतेति। अनवरतंप्रतिक्षणंपरिस्पंदमाना अपरिमिताः
पदनादिपरमाणवस्तैस्सह यश्चेतनस्यात्मनः संयोगसंतानस्तद्द्वारा तदंतःपातिव्य
क्तीनां तदंतर्गतव्यक्तीनामविरतंप्रतिक्षणमुपरमान्नाशादित्यर्थः। प्रतिक्षणंसंयो
गनाशजनकक्रियासंपादनापानवरतमितिस्पंदक्रियाविशेषणं। वापुंतेजसोर
विलंबगतिकत्वेपिद्वित्र्यादिरूपत्वेकर्मैवत्तिकर्मोतरानुत्पत्त्याप्रत्तिक्षणंक्रियाया
असंभवादाहापरिमितेतिपृथिव्यादेर्विलंबगतिकत्वात्पवनादीनि अंबपव्यप
क्षयावैवकृत्वात्परमाणुपर्यंतानुतेषांप्रतिक्षणनिवेशोमानाभाव इत्यत आह फ
लेतितादृशेतिप्रतिक्षणवृत्तितादृशसंयोगनाशेत्यर्थः। कल्पनासंभवादित्तिका

र्योनुत्पत्त्यन्यथानुपपत्त्याकारणविरहकल्पनंतादृशाकल्पनंविनानसंभवतीति
भावः।ननुतत्रानुमितिरूपकार्यानुत्पत्त्यन्यथानुपपत्त्यासिद्ध्याभावादिरूपकारणांत
रविरहएवकल्प्यः ननुनिरुक्तकारणविरहइतिनतादृशाकल्पनमित्यतआहका
रणेति।ननुनिरुक्तस्यकारणत्वनिश्चयएवतादृशाकारणत्वानुपपत्त्यातादृशाकल्प
नेसएवतुनसंभवतितादृशस्थलएवान्वयव्यभिचारसंदेहेननप्रवृत्तिप्रतिबंधा\
दित्यतआह।अन्वयेतिअविरोधित्वादितिग्राह्याभावानवगाहित्वादितिभावः ननुत
न्निर्णयवत् तत्संदेहोपिप्रतिबंधकएवेत्यतआहउपादीयतांवेति।दर्शितस्थले
ऽनुमितिप्रतिबंधकाइतिशेषः।स्वीक्रियतामित्यर्थः समयविशेषः तदात्मनिपदा
नानुमितिर्जायतेतत्क्षणव्यवहितपूर्वक्षणः एवंचकालिकसंबंधस्यसामाना

धिकरणे प्रतिबंधकत्वं च तत्तदीयस्वरूपसंबंधेन बोध्यं । इदं च क्षणिकः क्षणसं
बंधः प्रत्यधिकरणं भिन्न इत्यप्येतदभ्युपेत्य । तादृशासमयस्य पुरुषांतरीयानुमि
त्यव्यवहितपूर्वक्षणवर्तित्वात् संबंधपर्यंते । ननु तादृशक्षणसंबंधेनाभावः ।
वरं क्षणत्वक्षणिकोऽभ्युपेयतां तत्संबंधस्तु तद्रूप एवेति तत्तदात्मक्षणविशेषसं
बंधस्य स्वसमानाधिकरणान्यपुरुषीयानुमित्यव्यवहितपूर्ववर्तित्वाद् प्रतिबंध
कत्वापत्तिः । एवं दर्शितस्थले सिद्ध्यात्मकपरामर्शीयत्वानुमितिरूपस्तत्र तादृश
संयोगेनाशस्य प्रामाण्यकत्वेपि अनुमित्साकालेऽनुमित्यापत्त्या शेषकल्पद्वयानु
सरणं तत्कल्पद्वये गौरवमित्यत आह भवेदिति । एकपुरुषीयानुमितिकाले इत्यस्या
प्यनुमितिप्रसंगादाहतत्तदिति । तत्तदीयेति । एतादृशक्षणत्वसंबंधेन तत्तत्पुरु

13

षीयानुमितिविशिष्टत्वादिनेत्यर्थः। तेनाननुगमः। इत्थं च कालिकसंबंधेन कार्यका
रणभावो बोध्यः। ननु स्वसामानाधिकरण्यस्यानुमितौ निवेशे नैव सर्वसाधारण्ये
पुरुषभेदेनानंतकारणतास्वीकारोऽनुचितः परामर्शादिसाधारण्येन तत्परित्यागो
पीत्याशयेनाह तादृशेति। अनुमितिसामान्यं प्रतीत्यादि। स्वसामानाधिकरण्या
वच्छिन्नस्वाव्यवहितपूर्वक्षणवृत्तित्वसंबंधेनानुमितिविशिष्टत्वादिनेत्यर्थः। एते
न पुरुषभेदेनानंतकारणत्वकल्पनापेक्षया लिंगपरामर्शादेः कारणत्वमेवोचि
तमिति परास्तं। लिंगभेदेन कारणताभेदस्यावश्यकत्वेन पुरुषापेक्षया लिंगस्य
बहुतरत्वात्तत्रैव गौरवाच्च। आत्मवृत्तिद्वित्वादिकमादायातिप्रसंगवारण
यावच्छिन्नेति। उक्तरूपेण कारणत्वस्वीकारेऽनिष्टं दर्शयति तथाचेति उपमा

नादेरित्यादिनाप्रत्यक्षत्वाद्यपरिग्रहः। तत्पूर्वत्वं सर्वत्रानुमितिसामग्र्यसंभवेनै
वप्रत्यक्षामित्युपमितित्वाद्यमितिकालेऽनुमित्यसंभवात्तेषां प्रमाणांतरत्वबीजं
तच्च न संभवति न च तत्रानुमितिस्वीकार एव निरुक्तकारणसंभवादित्यात्राये
नाह सर्वत्रेति प्रमितिसामान्यस्याव्यवहितपूर्वक्षण इत्यादिननुतुल्ययुक्त्याप्र
त्यक्षादिप्रमितिं प्रत्यप्यनुमितिपदस्थाने प्रत्यक्षप्रमित्यादिपदं निक्षिप्य निरुक्त
रूपेण कारणत्वं वाच्यं। तथा च सर्वत्रैव सर्वजातीयप्रमितिं स्वीकृत्य तत्कारणं स्वी
क्रियतामिति तुल्यवृत्तिकनानाजात्यस्वीकारेण ज्ञानयौगपद्यास्वीकारेण च सर्व
स्या एव प्रमितेरेकजातीयत्वापत्तिः। अथ प्रत्यक्षादिप्रमितिकाले साक्षात्करोमि
नानुमिनोमीत्याद्यनुव्यवसायात् प्रत्यक्षादिप्रमितिकालेऽनुमित्यभावस्यानु

न विकल्पत्वान्न तत्रानुमितिस्वीकारसंभव इति चेत्तर्हि तेषां प्रमाणान्तरत्वं गोप्यसंगत
एवेत्यत आह विलीपेत चेति। प्रागुक्तसविषयकत्वादिना परामर्शादेरपि हेतुत्वसंभ
वादाह परामर्शत्वादिनेति। आदिना विशेषणज्ञानत्वादिपरिग्रहः। निरुक्तरूपेण
बाधादेरपि प्रतिबंधकत्वसंभवादाह बाधत्वादिनेति। ननु परामर्शत्वेन कारणत्वंने
ष्यत एव विशेषणज्ञानत्वादिना बाधत्वादिना च विशिष्टबुद्ध्यादिसामान्यं प्रति कारण
त्वात् प्रतिबंधकत्वाच्च मतयोर्विलयद् इत्यत आह नन्वेवं चेति कार्यान्तरेषु प्रत्यक्षादिका
[illegible] र्येषु [illegible] ज्ञानमिति विशेषणज्ञानत्वसंनिकर्षत्वादिना चेत्यादि। अनयोस्त्वमिति विशे
षणज्ञानत्वादिना बाधत्वादिना च कारणत्वस्य प्रतिबंधकत्वस्य चाभाव इत्यर्थः। अ
[illegible] ज्ञानामिति। विशेषणज्ञानत्वसंनिकर्षत्वादिना ऽ[illegible] ज्ञानां कारणानां बाधत्वादिना

च ऽ ष्टानां प्रतिबंधकानां च तथात्वं प्रसज्येतेत्यर्थः । चपः । तथात्वं कारणत्वं प्रतिबं
धकत्वं चेत्यर्थः । तादृशाप्रत्यक्षाव्यवहितपूर्वक्षणवर्त्तिनां तद्भिन्नानां चोदासीनानां
निरुक्तकारणताप्रतिबंधकतावच्छेदकाक्रांतत्वादिति भावः । अत एवेति अनुमित्य
व्यवहितपूर्ववर्त्तिसिद्धीनां तत्तद्व्यक्तित्वावच्छिन्नाभावस्य हेतुत्वेऽमं न तकार्यकार
णभावप्रसंगादेव तादृशासिद्धित्वावच्छिन्नाभावस्य च हेतुत्वेऽव्यवहितपूर्वत्वघ
टकतया कार्योत्पादादेः कारणतावच्छेदककोटिप्रवेशोऽन्योन्याश्रयस्योक्तप्रतिबंदी
नां च सत्त्वादेव चेत्यर्थः । द्वितीयोऽनुमित्यव्यवहितपूर्ववर्त्तिसिद्धिभिन्नसिद्ध्यभाव
मात्रे पक्षतेति कल्पः । नाद्य इत्यत्र न द्वितीय इत्यत्र चोभयत्र दोषमाह वैयर्थ्याच्चेति ।
न च पूर्वकल्पे ज्ञानेच्छयोर्योगपद्ये यत्रानुमितितदिच्छोत्पत्तिरेकस्य तत्र पराम

15

षोदेः सिषाधयिषाविरहविशिष्टो यः स्वक्षणाव्यवहितोत्तरक्षणस्तदुत्पत्तिकानु
मितिकभिन्नत्वेन प्रतिबंधकत्ववारणाय सिद्धिपदं सार्थकमिति वाच्यं। ज्ञानेच्छयोर्यौ
गपद्येयत्रानुमित्सानाशकाले सिद्धिरथानुमितिः तद्दिने तत्र सिद्धिपददानेपि तादृ
शसिद्धेर्विरोधितापत्तेः। नच सिद्धिपदं विना सिषाधयिषाविरहविशेषणमुभय
त्रैव व्यर्थं यत्र क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र प्रथमक्षणे अनुमित्सोत्प
त्तिक्षणे नष्टज्ञानादेरेव विरोधित्वेन पक्षतापत्त्यसंभवात्। तादृशासिद्ध्यादीनां च
तादृशानुमितिकत्वेन द्वितीयक्षणे पक्षतासंभवाच्चेति वाच्यं। यत्रानुमितिसिषाध
यिषानुमितयस्तत्र प्रथमक्षणे पक्षतावारणाय तत्रैव द्वितीयक्षणे पक्षतासंपत्तये
तदुभयोपादानादिति। समानविषयकलौकिकप्रत्यक्षस्थले सामग्रीकाले ऽनु

४

मितिवारणाय मूलस्थसाधकपदस्य यथाश्रुतार्थरक्षणाय च सिद्ध्यनुमानातिरि
क्तपदं पूरयतो यज्ञपतेर्मतमाह सिषाधयिषेति। अन्यतरस्मिन् विशिष्टे तन्निवे
शे सकृन्निवेश इति लाभायोः समस्तत्वं। अनुमानरूपसाधकमानस्यानुमितिपू
र्वं नियमतः सत्त्वेन सिषाधयिषां विना कदाप्यनुमितिर्न स्यादतोऽनुमानातिरि
क्तेति अनुमित्यतिरिक्तेत्यर्थः। इदं च साधूधात्वर्थक्रियाविशेषणं न तु साधकवि
शेषणं अनुमितिकारणान्यार्थकं। गौरवात्। अलौकिकप्रत्यक्षातिरिक्तेत्यपि बोध्यं
। यत्तु साधकमानपदमनुमित्यतिरिक्तप्रमितिसामान्यपरं यदि तदा समानवि
षयकशाब्दसामग्रीकालेऽनुमित्युत्पत्त्यनापत्तिः। न चेष्टापत्तिः। नापि समभिव्याहृत
पदार्थसंसर्गव्याप्यधर्मवत्त्वं वा कार्यस्यानुमेयत्वापत्तेरिति मणिकृद्योग्यताग्रंथ

विरोधापत्तेरितितन्नतद्ग्रंथस्यशाब्दप्रमाण्यखंडनपरत्वात्। समानविषयकत्वा
दृसामग्र्या अबलवत्वेस्वनिवर्तकप्रत्यक्षादीत्यादौप्रत्यक्षादिकारणंचक्षुरित्या
दौचाग्रिमदीधितिग्रंथेआदिपदस्यासंगत्यापत्तेश्च। तदुपहितंस्वजन्यसिद्धिविशि
ष्टंतत्सामग्रीसिद्धसाधारणकारणसमुदायः। विनानुमित्सामितितत्त्वेविरो
षणांभावादेवविशिष्टाभावसंभवइतिभावः दोषांतरमाहानुमानातिरिक्तेति। अ
नुमितेः पूर्वमनुमानस्यापितदुपहितत्वाभावादितिभावः। अथसिद्धिविशिष्टसत्वे
सिद्धिसत्वावश्यकत्वात्साधकमानपदमपिव्यर्थमितिचेन्न। प्रत्यक्षोपहितसंनि
कर्षादिसत्वेऽशाब्दमन्यज्ज्ञानंजायतामितीच्छायाःसिद्ध्यावुत्तेजिकायाःसत्वेचानुमि
तिवारणायतत्सार्थक्यात्। अप्रामाण्य। ज्ञानास्कंदितसिद्ध्युपहितस्यविरोधित्व

संपादकत्वाच्चँ सिद्ध्युत्तरकालीनत्वं तदुपहितत्वं मानत्वमपि विवक्षितं एकचाक्षु
षजननोत्तरचाक्षुषोत्तरसामग्री कालायच्छिन्नचक्षुरादिकाले सिद्ध्यभावात् तत्रा
नुमितिवारणाय साधकमानपदसार्थक्येऽप्यनुमानस्य व्याप्तिस्मरणादेः स्वजनि
तानुमितिनाशानंतरमनुमितिजनकत्वासंभवादनुमानातिरिक्तेत्यस्यवैयर्थ्य
मिति सांप्रदायिकाः। तच्चिंत्यं। जनितैकसिद्धिकापरसिद्धिसामग्रीशून्यचक्षुरादेर
पिप्रतिवंधकत्वापत्तेः। अनुमानातिरिक्तसाधकमानपदस्यैव वैयर्थ्यमित्यपि केचि
त्। अनुमितीत्यस्यानुमित्साविरिशिष्टत्वादि अन्योन्याश्रय इति अनुमितिसामग्रीता
दृशाप्रत्यक्षसामग्र्यभावघटिता तादृशाप्रत्यक्षसामग्री चानुमितिसामान्यभावघ
टितेति तादृशैकसामग्रीज्ञानाधीनमपरसामग्रीज्ञानमित्यन्योन्याश्रयादित्यर्थः

तथाचनकार्य्येकारणभावापह्नुत्तिभावः ननुपक्षताघटकप्रत्यक्षसामग्रीनानु
मितिसामग्र्यभावघटिताकिंतुतदनिरिक्तप्रत्यक्षासाधारणकारणसमुदायरू
पावाच्या एवंप्रत्यक्षंप्रत्यनुमितिसामग्रीप्रतिवंधकतायांपक्षताननिवेशनीयेति
नान्योन्याश्रयइततआह स्थाणुत्वेतिप्रतियोगीतितद्वितीयक्षणजातेत्यादिप्रत्य
क्षेति लौकिकप्रत्यक्षेत्यर्थः। स्थाणुत्वारोपेति। स्थाणुत्वाभावप्रत्यक्षाव्यवहितपू
र्वस्मिन्नित्यादि। अनुमित्यापत्तेरिति तथाचतत्रानुमितिवारणायानुमित्यन्यसिद्धि
सामग्र्यभावस्यकार्यकालवर्त्तितयाप्रतिवंधकत्वावच्छेदकत्वेपक्षतायोनादृशसा
मग्रीप्रवेशोव्यर्थः सिद्धिघटितपक्षतायाश्चकार्यकालवृत्तितयाप्रतिवंधकत्वासं
भवादितिभावः। केचिदित्यस्वरस्यवीजंप्रतियोग्यारोपहेतुतायाएवखंडनामि

ति। स्वयं दूषणांतरमाह वस्तुतस्त्विति। ननु प्रत्येकाभावयोः परस्परं स्वतंत्रान्वय
शालित्वेपि कारणताद्वयकल्पनागौरवमत आह नियमेनेति तादृशान्यतराभा
वोपस्थितिकाले प्रत्येकाभावयोर्नियमेनोपस्थितत्वादित्यर्थः। ननु तादृशान्यतरत्वं ना
स्तीति शाब्दीकालेन तादृशासिद्ध्यभावादेरुपस्थित्यभावान्नियम इत्यत आह लाघ
वादिति। गुरुशरीरतादृशान्यतराभावत्वापेक्षया प्रत्येकाभावत्वस्य शरीरलाघ
वादित्यर्थः। प्रत्येकं सिद्ध्यभावत्वादिना। तथात्वं कारणत्वेन ननु हेतुताद्वयापेक्षया
हेतुत्वमेकमुचितमित्यतस्तत्र प्रतिबंदिमाहान्यथेति एकहेतुत्वानुरोधेन स्वतंत्रा
न्वयव्यतिरेकशालिनोर्लघीयसोर्हेतुत्वद्वयमुपेक्ष्यत त्पातियोगिनोरन्यतरत्वेना
भावहेतुत्वकल्पनेइत्यर्थः --- देरित्यादिना सत्प्रतिपक्षपरामर्षाभावादिपरि

ग्रहः। तत्तदभावानां नानाकारणत्वे गौरवात् तथा च एककारणपरिशेषापत्तेरि
ति भावः अत्रैव पक्षताप्रतियोगिकोटावेव अंतर्भावो घटकत्वं अथ वन्ह्यादिविधे
यकानुमितिप्रतिबंधकतासिद्ध्यप्रतिबध्यायामपि वन्हिमत्पर्वतवान्देशः इत्यनु
मितौ वह्न्यादिप्रत्यक्षादौ च बाधनिश्चयस्य प्रतिबंधकतया वह्न्यादिप्रकारतासा
मान्यघटितविशिष्टबुद्धित्वरूपधर्मावच्छिन्नं प्रत्येव तस्य प्रतिबंधकत्वमावश्य
कमिति तेषां पक्षताकुक्षिनिक्षेपो व्यर्थ इति चेन्न। तत्रापि तत्तदसाधारणकारणा
भाववत्तादृशप्रतिबंधकबाधादीनां च तुल्ययुक्त्यान्यतमत्वेनाभावहेतुत्वे विशिष्टबु
द्धिसामान्ये बाधत्वादिना प्रतिबंधकत्वाभावात् अवच्छेदकगौरवस्य स्वहस्तितत्वा
त्। के चित्तु प्रत्यक्षस्थले इच्छाया उत्तेजकत्वानुरोधेन बाधादेः प्रतिबध्यतावच्छेद

कं विशिष्टप्रत्यक्षत्वं वन्ह्यादिप्रकारकानुमितित्वं च न तु विशिष्टबुद्धित्वमित्या
हुः तन्न वन्हिमत्पर्वतसाध्यकानुमित्यादिप्रतिबंधकतया तथाप्यप्रतीकारात्
अन्ये तु अत्रैवेति पाठं कल्पयित्वा बाधादेरंतर्भावप्रसंगादित्यस्य विशिष्टधीसामा
न्ये बाधसत्प्रतिपक्षयोरन्यतरत्वेन प्रतिबंधकतायामंतर्भावप्रसंगादित्यर्थं वद
न्ति। अपरे तु बाधः परामर्षप्रामाण्यबाधः परामर्षीयाप्रामाण्यज्ञानमिति यावत्।
आदिनान्यमात्रलिंगकेच्छापरिग्रह इत्याहुः। अत्र पूर्वस्मिंश्चोभयत्र न चेत्याद्यग्रि
मग्रंथविरोधस्तन्नाशंक्यः तस्य प्रत्येकाभावहेतुत्व एवाशंकापरत्वान्न तु प्रतिबं
ध्ये। यत्तु ननु सिद्धितत्सामग्र्योरन्यतराभावस्य न व्यक्तित्वेनैकहेतुत्वापेक्षयाप्रत्ये
काभावयोस्तत्वेऽनेकत्वमवच्छेदकगौरवं चेत्यत्र प्रतिबंदिमाहान्यथेति अभाव

स्यतद्व्यक्तित्वेनहेतुत्वइत्यर्थःतथाचसर्वेषांकारणाभावानांप्रतिबंधकानांचान्य
तमत्वेनाभावस्यतद्व्यक्तित्वेनकारणत्वप्रसंगादितिसमुदायार्थः।तद्व्यक्तित्वेना
भावस्यान्यथासिद्धिस्तुप्रकृतेपीतिभावइतितन्नसंदर्भविरोधात्।निरुक्तसिद्धित्वा
वच्छिन्नाभावहेतुतायामपिस्वमतेतादृशरीतिसंभवात्।नचेतिगौरवमित्यन्वपि
प्रत्येकमितिसिद्धौतत्सामग्र्याःप्रत्येकमित्यर्थः।बाधादिघटितान्यतमस्मिन्विशे
षणत्वेबाधादिकालेप्यनुमितेस्तयानुमित्यापत्तेरितिभावः।गौरवमितितथाचसिषा
धयिषाविरहविशिष्टस्यासिद्धितत्सामग्र्यन्यतरस्याभावहेतुत्वलाघवात्।ननुबा
धादिघटितान्यतमस्याभावउक्तगौरवादितिनप्रतिबंधकत्वादितिभावः।अन्य
तरत्वेनाभावहेतुत्वपक्षेपितस्यप्रत्येकविशेषणत्वमावश्यकमित्तिनगौरवमि

त्याहत्त्वावच्छिन्नविषयिताशाब्दान्यसिद्धिसत्वे तादृशेच्छैव न भवतीति शाब्देति अशा
ब्दमिति पर्वते वह्निरित्यादि अन्यथोक्तेच्छायाः सत्त्वघटितत्वेन सिद्धावुत्तेजकतयो
क्तेः सामान्यामुत्तेजकत्वेपि न क्षतिः विरहस्येति पृथगेव विशेषणतया यादृशस्य शि
मान्वपि तादृशेच्छायां पर्वते वह्निः शाब्दज्ञानं जायतामितीच्छायां अनुमितित्वादी
त्यादिना प्रत्यक्षाद्यन्यज्ञानत्वादिसंग्रहः। स्वनिवर्तकेति स्वं तादृशेच्छा तन्निवर्तक
प्रत्यक्षादि प्रत्यक्षं शाब्दमुपमितिश्च तत्सामग्रीसमवहितं यत्स्वं तदन्यत्वादिने
त्यर्थः। तथा च प्रत्यक्षसामग्र्या कालीन तादृशेच्छायां तादृशसामग्रीसमवहितत्वान्नो
त्तेजकत्वमिति न पृथग्विशेषणतेति भावः। सविषयकस्थले स्वरूपसत् सिद्धत्व
स्यापि इच्छाविरोधित्वात्तादृशाविरोधित्वमेव निवर्तकत्वमत्र बोध्यं। अनुमितिसा

२०

मग्रीकालीनतादृशेच्छासंग्रहाय प्रत्यक्षादीति। ननु सिद्धिमात्रेप्यायादृच्छाउत्तेजिकातत्तद
भावविशिष्टसिद्धितत्सामग्र्यन्यतरस्मिन्ननुमितित्वप्रकारकेच्छाविरहस्य विशेषणत्वे
लाघवंबाधादेर्निवेशोच तस्य प्रत्येकविशेषणत्वे गौरवान्नप्रतिबंधवकाशः यदिचाशाब्दं
ज्ञानेजायतामितीच्छा ततः सिद्ध्यात्मकपरामर्शस्ततोऽनुमितिस्तत्रानुमितिक्षणे तादृशेच्छा
विरहविशिष्टतया तादृशासिद्धेरन्यतरमध्यपतितयाऽनुमितित्वप्रकारकेच्छाविशिष्टाया
स्तस्याः सत्वादनुमितिर्नस्यादिति विभाव्यते तदा तादृशान्यतमत्वेन प्रतिबंधकत्वेपितु
ल्यमेतत्। किंच यत्र विषयविशेषेऽनुमितित्वप्रकारिकेच्छाजाता न तु अशाब्दज्ञानजा
यतामित्याकारिकापि तत्र तादृशेच्छाविरहस्य प्रत्येकविशेषणत्वे गौरवान्नप्रतिबंधव
काशः अपि च प्रत्येकाभावस्य हेतुताद्वयमपेक्षान्यतराभावस्यैकहेतुत्वे लाघवमित्य

च्छेदकगौरवमप्यकिंचित्करमित्यत आहान्यतरत्वेति।अन्योन्याभावयोःसिद्धितत्सा
मग्रीभेदयोः।मिथःपरस्परं।तथाचसिद्धिभेदविशिष्टसामग्रीभेदावच्छिन्नभेदःसामग्री
भेदविशिष्टसिद्धिभेदावच्छिन्नभेदोवातदन्यतरत्वंतदवच्छिन्नाभावत्वेनहेतुत्वेपिहे
तुताद्वयंसिषाधयिषाविरहस्यपृथग्विशेषणत्वंचावश्यकमित्यवच्छेदकलाघवात्प्रत्ये
काभावेहेतुत्वमेवोचितमितिभावः।नचतादृशान्यतरत्वरूपभेदयोस्तदवच्छिन्नाभावयो
श्चसमनियततयाभेदाभावान्नहेतुतत्वावच्छेदकयोर्भेदइतिनकारणताभेदइतिवाच्यं
।तादृशविशिष्टभेदावच्छिन्नाभावत्वत्वरूपावच्छेदकतावच्छेदकभेदेनहेतुताभेदात्
स्वरूपतोज्ञातस्यैवस्वरूपतोऽवच्छेदकत्वात्।तद्व्यक्तित्वेनाभावस्यावच्छेदकत्वस्य।
सिद्धांतविरुद्धत्वाच्चाखंडभेदस्यतादृशावच्छेदकत्वासंभवः।तद्व्यक्तित्वस्याभावस्व

रूपत्वात् स्वरूपतोभानासंभवेन नावच्छेदकत्वसंभव इति केचित्। तन्न घटादिनि
ष्ठतद्व्यक्तित्वस्यापि तत्स्वरूपतया स्वरूपतोभानानुपपत्तेः। यदि च विलक्षणस्वरूप
संबंधेन घटादिरूपतद्व्यक्तित्वस्यापि स्वरूपतोभानं तदतिरिक्तत्वं वांगीकरोषि तदा
प्रकृतेपि तुल्यं। प्रतियोगितावच्छेदकसंबंधभेदेनापि हेतुताभेदमाह आत्मनिष्ठेति
भिन्नभिन्नेन स्वजनकादृष्टादिरूपेण कालादिघटितसामग्र्याः प्रतिबंधकत्वे प्रयोज
नाभावात् गौरवाच्चाह साधारणकारणेति आलोकसंयोगावच्छिन्नतत्पुरुषीयम
मः संयुक्तचक्षुःसंयोगादीत्यर्थः। तत्सामग्र्याः सिद्धिसामग्र्याः आत्मनिष्ठध्वंसाभावः का
रणमिति पर्यवसानान्वयः तादृशसंयोगादेः समवायेनाभावस्यात्मनि सदैव सत्वस्य च
नायात्मनिष्ठत्वोक्तिः विषयनिष्ठस्य तस्य प्रतिबंधकत्वे समवायेन सिद्ध्यभावस्य द्वि

षये सर्वे दैवसत्वादतिप्रसंग इति सूचनाय सिद्ध्यभावस्यात्मनिष्ठत्वमुक्तं। नन्वालोक
संयोगावच्छिन्नविषयसंयोगविशिष्टचक्षुःसंयुक्तमनःसंयोगरूपसामग्रीसिद्धि
ष्वेतदन्यतरस्यसमवायेनाभाव आत्मनिष्ठ एव कारणमस्तु अत आह मणिवि
शिष्टस्येति दाहं प्रतीत्यादिवन्हेरिति अनुमितिं प्रती विशेषः। अयोगादित्ति गोरवा
दिति भावः। एतेन तत्र वन्हेः प्रवेशः प्रयोजनाभावान्मास्तु तत्र संबंधे क्यार्थमेव मनोयो
गप्रवेशः इति परास्तं। तथाच्चेति संबंधद्वयावच्छिन्नप्रतियोगिताकाभावद्वयस्य हेतु
त्वावत्रयकत्वे चेत्यर्थः। कथं कि मर्थं। अनुगतरूपेण तादृशान्यतरत्वेन कारणमित्ति
वाच्यमिति शेषः। नन्वन्यतरत्वावच्छिन्नस्य संबंधद्वयेनाभावद्वयमेव कारणं वाच्यं
तथाच तवापि प्रत्येकाभावद्वयं कारणमित्ति विनिगमनाविरहादन्यतराभावहे

तुतासिद्धिः तत्र चावच्छेदकगौरवसत्त्वेपि सिषाविरहस्य चतुर्थो विशेषणत्वेना
प्यवच्छेदकगौरवं दर्शयति एवमिति सिषाधयिषाकालीनसिद्धेरपि तदात्मवृत्तिना
कालांतरीयेण तत्कालीनेन वान्यात्मवृत्तिना सिषाधयिषाविरहविशिष्टत्वादाह ए
ककालावच्छेदेनेति एकात्मेति च कालोऽत्र क्षणः तेन स्थूलकालावच्छेदेनैकात्मनि
तदुभयसत्त्वेपि न क्षतिः तथा च स्वावच्छेदकक्षणावच्छिन्नत्वस्वनिरूपकाधिकर
णतासमानाधिकरणनिरूपकाधिकरणताकत्वोभयसंबंधेन स्वनिष्ठवृत्तिविशि
ष्टासमवायावच्छिन्नावृत्तिरिति निष्कर्षः॥ तेन नित्येन सर्वकालावच्छिन्नेनात्मनि स्या
विरहे ऐककालावच्छेदेनैकात्मवृत्तित्वस्यानुमित्साकाले सिद्धौ सत्त्वेपि न क्षतिः॥ य
दि च कायव्यूहस्थले विभिन्नशरीरावच्छेदेन सिद्ध्यनुमित्सासत्त्वे नुमित्सावच्छेद

कशरीरावच्छेदेनानुमितिर्जायते नासिध्यवच्छेदकशरीरावच्छेदेन तदासंबं
धत्तासंबंधवच्छेदकतानियामकसंधमध्येस्वावच्छेदकशरीरावच्छिन्नत्वं एतत्संं
बंधेन तादृशासिद्धिविशिष्टान्यत्वं च प्रतिबध्यतावच्छेदके निवेश्यं। न च तादृ
शाभावस्य विशेषणत्वं एककालावच्छिन्नत्वं व्यर्थमिति वाच्यं। एतादृशासंबंधे
न प्रकारतया एवात्र विशेषणतापदार्थत्वात् अन्यादृशामितिसिषाधयिषावि
रहेणैव विशिष्टमिति पूर्वेणान्वयः। शेषवृत्तौ समवायावच्छिन्नेति परिसज्य
स्वजनकादृष्टादिसंबंधावच्छिन्नेति निवेशानेन पूर्वानिष्कर्षोऽस्यापि वोध्यः। त
थाच सिषाधयिषाविरहस्य प्रत्येकविशेषणत्वे द्विधा एवमन्यतरत्व घटकयो
र्भेदयोर्विशेष्यविशेषणभावे विनिगमकाभावेन द्विधा निवेशः इति तत्स्य च

23 तुर्धौनिवेशाद्इति भावः॥ नन्वेवं सामग्रीविरोधाभावस्य स्वातन्त्र्येणानुमितिहेतु
त्वे स एव पक्षपदप्रवृत्तिनिमित्तमस्तु तथा च पक्षपदप्रवृत्तिनिमित्तमिदमि
ति फलविरोध इत्यत आह सामग्रीति लाघवात् सिद्धिसामग्र्यभावापेक्षया सिद्ध्य
भावस्य लघुत्वात् इदमुपलक्षणं। सिद्धसाधनस्थले पक्षव्यवहारविरहाच्चेत्य
पि बोध्यं॥ नन्वेवमतिलाघवाद्बाधाभाव एव तत्प्रवृत्तिनिमित्तमस्त्वित्यत आह फ
लानुपहितेति इदं चारतिगौरवप्रदर्शनाय आवश्यकत्वे पक्षपदप्रवृत्तिनिमि
त्तत्वावश्यकत्वे सिद्धसाधनस्थले साध्यनिश्चयकाले। ननु बाधकाले पक्षव्य
वहाराभावाद्बाधाभावोपि नात्र निवेश्यतां गौरवस्याप्रामाणिकत्वादत आह बा
धाभाव इति बाधितस्थले पक्षव्यवहारस्योभयासंमतत्वादिति भावः॥ नेति प

क्षपदप्रवृत्तिनिमित्तइत्यादि नन्वेवं समवायेन सिद्ध्यभावस्य हेतुत्वात् सिद्धिकाले
पर्वतादौ पक्षव्यवहारः स्यात् न स्याच्चायमात्मा सुखीतदात्मत्वादित्यादावऽनुमातुः
सिद्ध्यसत्वे सिद्धिमत्तदात्मनीत्यत आह विशिष्टेति सिषाधयिषाविरहेत्यादि सम
वायेनाभावस्य च नायात्मनिष्ठस्येवेति एवकारेण विषयनिष्ठतया हेतुत्वव्यवच्छेदः
अथ तादृशदेवपक्षव्यवहारसौष्ठवाय मोचितं तथा हि वह्नित्वावच्छिन्नविधेयतानिरूपि
तपर्वतत्वावच्छिन्नोद्देश्यतासंबंधेनानुमितिं प्रति वह्नित्वावच्छिन्नप्रकारतानिरू
पितपर्वतत्वावच्छिन्नविशेष्यतासंबंधेनाविशिष्टसिद्धित्वेन प्रतिबंधकत्वमिति चे
न्न एकपुंसि सिद्धिकालेऽन्यपुंसोऽनुमित्युत्पत्तये कार्यकारणयोस्तत्पुरुषीयत्वेनि
वेशनेनानंतकार्यकारणयोस्तत्पुरुषीयत्वनिवेशेनानंतकार्यकारणभावप्रसं

24

गात् निरुक्तस्य कार्यतावच्छेदकसंबंधस्याधिकस्य निवेशो गौरवाच्च परंपरासंबं
धादेवेति एवकारेण साक्षात्संबंधव्यवच्छेदः एतस्य फलाच्चै माभासोक्तद्वितीयदो
षवारणं परंपरासंबंधः स्वप्रतियोगिनिरूपिततत्तद्धर्मावच्छिन्नप्रकारतानिरूपि
ततत्तद्धर्मावच्छिन्नविशेष्यत्वाभावः तत्तद्धर्मावच्छिन्ने साध्ये तत्तद्धर्मावच्छिन्ने पक्ष
व्यवहारप्रयोजकः स्वप्रतियोगितावच्छेदककोटिप्रविष्टविशेष्यतावच्छेदकत्व
त्वरूपः परंपरासंबंध इति केचित् तन्न कांचनमयपर्वतत्वादिना पर्वतादौ वकु
तरग्रेपक्षपदप्रयोगात् अयमिदानीमेतत्पुरुषस्य पक्ष इत्यादौ पक्षपदार्थैक
देशे विशिष्टाभावेन तत्कालावच्छिन्नैतत्पुरुषवृत्तित्वविशेषणेन तयाभासत्तेयु
त्यतिवैचित्र्यात् एतेन कालपुरुषभेदेन तच्छक्तिभेदोपि निरस्तः।। सिद्ध्यभावस्य

पुरुषभेदेपिनकारणताभेदःकिंतुवक्ष्यमाणयुक्त्यासिद्धिसामग्र्याइतिसिद्धितत्सा
मग्र्यन्यतराभावस्यपुरुषभेदेनानंतकारणतायांसिद्धिनिवेशोमहागौरवमित्याश
यवतांमनमाहैकस्यैवेतिअनुत्पादादितिएकस्यपुंसःप्रत्यक्षादिसामग्रीसत्वेतद्वि
रहिणोऽनुमित्युत्पादाच्चेतिशेषःतेनैककालावच्छेदेनएकात्मवृत्तित्वसंबंधेनानुमित्सा
विरहविशिष्टविजातीयसंयोगवन्मनःसंयुक्तचक्षुःसंयोगादेःप्रतिबंधकत्वकल्पनादे
वप्रत्यक्षादिसामग्रीसत्वेऽनुमित्साविरहिणोनानुमित्यापत्तिरित्युक्तावपिननिस्तारःइ
दमुपलक्षणंदोषाणांकालपुरुषविशेषनियंत्रिततयाकालपुरुषभेदेनकारणताभे
दइत्यपिबोध्यंतत्पुरुषीयानुमितिमितिकालिकसंबंधेनेत्यादितत्पुरुषीयेत्ति।नानु
मित्सायामिदंविशेषणंतत्पुरुषीयानुमित्सासत्वेघटादौतद्विरहसत्वेनतत्काली

२५

न सामग्र्याः प्रतिबंधकत्वापत्तेः किंतु तद्विरहे तथा च तत्पुरुषीयस्य तद्वृत्तित्वविशि
ष्टस्यानुमित्साविरहस्य यः कालोऽवच्छेदककालोऽनुमित्साविरहनिष्ठतत्पुरुष
वृत्तितावच्छेदकक्षणस्तद्वृत्तीति कालीनोंतार्थः सामग्रीविशेषविशेषणं दोषवि
शेषाजन्योपनीतभानसामग्रीवारणाय विशेषेति समानविषयेत्याद्युपमिति
स्मृतिसामग्र्या अप्यनुमितिप्रतिबंधकत्वात् अन्यथा प्रत्यक्षादिसामग्रीसत्त्व
इत्यत्रापि पदानुपपत्तेः विरह इति कालिकसंबंधावच्छिन्नाभाव इत्यर्थः। अत्र सा
मग्री च तत्तत्कारणविशिष्टचक्षुःसंयोगादिः विशेष्यविशेषणभावे विनिगमनाविर
हत्वगत्या स्वहस्तितः कारणसमुदायः समुदायत्वस्य नऽर्निरूप्यत्वात्। केचित्तु प
र्वतो वह्निमानित्यनुमितिसमानविषयकप्रत्यक्षसामग्रीप्रतितिबंधकतायां रूपा

दिकं न निवेश्यं तत्र पक्षसाध्ययो रूपादिमत्त्वानियमेन प्रयोजनाभावादित्याहुः
तन्न चक्षुःसंयोगादिसत्त्वेनुद्भूतरूपवदुद्भूतस्पर्शवद्वन्हेर्वन्हित्वेनुपर्वतेऽनुमि
त्यनुपपत्तेः। ननु प्रतिबंधकसत्त्वाधीनानुमित्यनुत्पत्तिमत्त्वपि काले स्वानधि
करणदेशावच्छेदेन प्रतिबंधकाभाववत्त्वादनुमित्युत्पत्त्यापत्तिः सामग्रीसत्त्वात्
दिति चेन्न व्याप्यवृत्तिभावकारणतास्थले। किं शरीरातिरिक्तदेशानवच्छिन्न
कारणसत्त्वस्य कार्योत्पादनियामकत्वात् बाधासिद्ध्यभावादेः शरीररूपदेशा
वच्छिन्नस्य सत्त्वेपि कार्योत्पादात् बाधादिकाले घटाद्यवच्छेदेन सत्त्वेपि कार्यानु
त्पादात् शरीरातिरिक्तत्वं देशाविशेषणं मनवच्छिन्नत्वं च सत्त्वविशेषणमिति।
अननुगतस्येति स्वजनकादृष्टवत्त्वादेः संबंधत्वेमानाभावेन दोषादेरननुगतत्वे

नचतादृशचक्षुःसंयोगादिरूपसामग्र्यभावस्यसर्वसाधारणहेतुत्वासंभवादिति
भावःहितुःकालिकसंबंधेनहेतुःवदंतीत्यस्वरसबीजंचतत्पुरुषवृत्तिविजानीय
संयुक्त संयोगाश्रयमनः''चक्षुर्विषयसंयोगत्वादिनाप्रतिबंधकत्वविशेषणविशेष्यभावे
विनिगमकाभावेनविषयसंयुक्तचक्षुःसंयुक्तमनःप्रतियोगिकतत्पुरुषीयविजानी
यसंयोगत्वेनवाकालिकसं[illegible]बंधेनतथात्वस्यावश्यकत्वेतत्रैवतत्पुरुषीय
त्वंपरित्यज्यसमवायेनकार्यप्रतितेनसंबंधेनप्रतिबंधकत्वंवाच्यतिपुरुषभेदेन
तत्कारणताभेदःस्वप्रतिबध्यप्रत्यक्षत्वादिजनकचक्षुरादिसंयुक्तमनःप्रतियोगि
कत्वसंबंधेनदोषविशिष्टत्वमपिप्रतिबंधकेनिवेश्यं।नचैवमणिविशिष्टत्वादि
ग्रंथविरोधइतिवाच्यं।तत्रगौरवस्यैवबीजत्वेनात्रतुपुरुषभेदेनानंतकारणभा

वाकल्पनेनमहालाघवात्‌। एवंचसिषाधयिषाविरहेप्येककालावच्छेदेनएका
त्मवृत्तित्वसंबंधेनविशेषणमित्यनुगतिरेवास्तीतिसिद्ध्यभावहेतुत्वंदूषयितुं
सिषाधयिषाहेतुत्वंशंकतेऽथेति। सिषाधयिषानुत्तरानुमितौव्यभिचारादाह
सिद्ध्युत्तरेतिअस्त्विनितथाचविशिष्टसिद्ध्यभावस्यनहेतुत्वमितिभावः। प्रति
बंधिमाहनचेति। हेतुत्वापत्तिरितिअग्रेतनेत्तननान्वयः। एवमत्रविशिष्टाभा
वस्याहेतुत्वंस्वीकारेणोत्तेजकस्यहेतुत्वेउत्तेजकानुत्तरदाहव्यभिचारादाहमण्या
दिस्थलीयेतिउत्तेजकस्यमणिमहौषध्यादेःअननुगतत्वादितिअनुगतानति
प्रसक्तधर्माभावादित्यर्थः तथाचकार्यवृत्तिव्यभिचारेणतेषांहेतुत्वासंभवेऽगत्या
विशिष्टमण्यभावएवहेतुःकल्प्यतइतिभावः। ननुतेषामननुगतत्वेतद्वित्त

विशिष्टाभावोपिकथमनुगतोऽत आह तावदभावेति तथा च यत्किंचिदुत्तेजक
सत्वएव तत्तदभावकूटविशिष्टमणेरभावसत्वादितिभावः इहापि सिद्धिस्थ
लेपि उदर्शितोयाहशीयाहशोष्टासत्व इत्यादिनादर्शितः तथा चात्राप्युक्तयुक्त्या
विशिष्टाभावएव हेतुर्वाच्य इतिभावः ननु पक्षसाध्यकस्थलेएकविधासिषा
धयिषाधीनैव सिद्धिकालेनुमितिस्तत्रासिषाधयिषायाअनुगतरूपेणैव हेतुत्वं
संभवतीत्यतः कार्यतावच्छेदकं खंडयति सिद्ध्युत्तरेति सिद्ध्युत्तरत्वस्यानुमितिमा
त्रवृत्तित्वयातिप्रसक्तेः सिद्धव्यवहितोत्तरत्वं च तत्तद्व्यक्तिविश्रांततयाननुगत
मितिभावः अनुमितिमात्रस्यैव स्वात्मकसिद्धिकालीनत्वात् स्यितीत्यग्रे स्व
तरेति चः सिद्ध्यधिकारणकालध्वंसाधिकरणत्वे सति सिद्ध्यधिकरणक्ष

णोत्पत्तिकत्वरूपं सिद्धिस्थितिकालीनत्वमपेक्ष्य लाघवादाह स्वेतरेति स्वभि
न्नत्वे सति स्ववृत्तित्वं स्वेतरसिद्धिकालीनत्वं। नाशकाल इति। नाशोत्पत्तिका
ल इत्यर्थः। तत्कालोत्पन्नानुमितेर्निरुक्तकार्यतावच्छेदकानाक्रांतत्वादिति भा
वः। ननु स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधेन सिद्धिविशिष्टानुमितित्व
मेव कार्यतावच्छेदकं संबंधाननुगमस्यादोषत्वात् अव्यवहितोत्तरत्वं चतृती
यक्षणसाधारणं वाच्यमिति नोक्तदोष इत्यत आह एकस्येति अन्यस्या अनुमि
तेः पुरुषांतरीयसिद्ध्यव्यवहितोत्तरक्षणोत्पत्तिकत्वेन कार्यतावच्छेदकाक्रांतत
त्वादिति भावः। तत्सिषाधयिषात्वेन तत्पुरुषीयसिषाधयिषात्वेन तथा च का
लिकप्रत्यासत्त्या कार्यकारणभाव इति भावः। स्वसामा।धिकरण्यावच्छिन्नस्वा

28

व्यवहितोत्तरक्षणोत्पत्तिरत्वसंबंधेन सिद्धिविशिष्टानुमितित्वमेव कार्यतावच्छेदक
मितिनानेन्तकार्यकारणभावप्रसंग इत्यत आह अपि चेति। सामान्यसामग्रीतः अनुमि
तिसामान्यहेतुपरामर्शादितः। ननु विशेषसामग्रीसमवहिताया एव सामान्यसामग्र्याः
फलोपधायकत्वान्नापत्तिसंभवः अनुमित्सारूपविशेषसामग्रीविरहादित्यत आह
न हीति ईदृशेति। अनुमित्सारूपेत्यर्थः। ननु विशेषसामग्र्यभावकूट एव सामान्यसा
मग्रीदशायां कार्योत्पादप्रयोजकः स च सिद्धिसत्त्वे विना सिषाधयिषां नास्तीत्यत आ
ह न चेति अन्यत्रापि सिद्धिसत्त्वकाले न च फलोपधायकत्वं तत्परामर्शादिव्यक्तीना
मेव विशेषसामग्रीत्वेन तदभावादेव नापत्तिसंभव इति वाच्यं परामर्शादिना एकानु
मितिजननोत्तरं विनश्यदवस्थेन विनापि सिषाधयिषामनुमित्संतरप्रसंगात्। न

नुतत्रतत्रतल्लक्षणसंबंधानां हेतुत्वं कल्प्यतां तावतैव नोक्तापत्तिरित्यत आह तत्
द् इति तत्तल्लक्षणसंबंधरूपविशेषसामग्रीत्यर्थः। अथ सिद्ध्यनुत्तरानुमितौ सिद्ध्यभा
वस्य हेतुत्वकल्पनयैव नातिप्रसंग इति चेत्तत्र कार्यतावच्छेदकगौरवात् कारणत्व
द्वित्वे गौरवाच्च न च तत्रापि विशिष्टाभावहेतुत्वे विशेष्यविशेषणभावे विनिगमकाभावा
त् कारणताद्वयमावश्यकमिति वाच्यं। व्यासज्यवृत्त्येकावच्छेदकतास्वीकारादिति।
शंकते इहेति सिद्ध्युत्तरकाले इत्यर्थः। सानुमितिः। सा च सिद्ध्युत्तरानुमितिश्च तत्कारण
मनुमित्यासा। सिद्ध्युत्तरानुमितिः। विनानुमित्सां सामान्यसामान्यसामग्र्याः सिद्ध्यनुत्तरा
नुमितिजनकत्वात्तादृशसामग्रीवलादनुमितिसामान्यं स्यादिति भावः। कारणमाव
मिति कारणमावश्यकं पूर्वोक्तरीत्या न संभवतीति भावः। प्रगल्भमतमाह करणव्या

पारत्वेनेति इदं च परामर्षस्य पक्षताकारणतावच्छेदकत्ववारणाय कारणतावच्छे
दिकेति पक्षताविशिष्टधर्मताज्ञानं हेतुरिति क्रमेणेत्यादि। प्रतिबंधकांतरवत्वा
धादिवत्। अन्यथा स्वतंत्रान्वयव्यतिरेकशालिनोऽप्य हेतुत्वे विषयनिष्ठदोषा
भावादेः प्रत्यक्षनिमित्तकारणस्यात्मनि निवेशासंभवादाह यथासंभवमिति।
यथा इच्छादिकं प्रतिज्ञानादेः तत्र ज्ञानादिविशिष्टत्वेन हेतुत्वेऽनेतिप्रसंगासंभवा
दिति समवायिकारणस्य तादात्म्येन कारणत्वं लघुत्वेनावश्यकमिति भावः। तद
भावस्यानुमितिसाधारणसिद्ध्यभावस्य। कार्यकालवृत्तेरेवेति। यत्र प्रतिबंधका
भावत्वं तत्र कार्यकालवर्त्तितया जनकत्वमिति नियमः स एव भावस्य लेदृष्टत्वा
दिस्पर्षः। अनुमितिकाल इति अनुमित्साविनेति शेषः। तदसंभवात्। विशिष्टसि

ध्यभावासंभवात्। सोऽनुमितिः। सहचारदर्शनमात्रेण न व्याप्तिनिश्चय इति तादृ
शानियमं खंडयन् समाधत्ते यस्येति तथात्वेन कार्यकालवृत्तित्वेन। अन्यथा सह
चारदर्शनमात्रेण प्रतिबंधकाभावे कार्यकालवृत्तितया हेतुत्वनियमसिद्धौ।
भावकार्यस्यासमवेतत्वक्षणिकत्ववारणाय समवायिकारणस्य कार्यकाल
वृत्तित्वेन हेतुत्वमित्याशयो नाह समवायीति प्रतिबंधकाभावदृष्टांतसत्वे सम
वायिकारणपर्यंतानुधावनं चातिरिक्ताभावं मण्यादिप्रतिबंधकत्वं चानुपगच्छ
तां प्रागभावकारणं मतसाधारण्याय मात्रपदं कृत्स्नार्थकं। तथात्वप्रसक्तौ। कार्यका
लवृत्तित्वेन कारणत्वप्रसक्तौ।।

न्याय

पत्रे ३०

नव्यशोद्धी

५०

[illegible]